# A-I/1/22AMIS1CCTC1/23

**प्रथमसत्रार्द्धः**

**प्रथमपत्रम् (DSCC-16)**

**मीमांसा**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. दर्शपूर्णमासगान् षड् प्रधानयागान् लिखत।
2. प्रयाजादीनां सकृदनुष्ठाने विनिगमकं किम्?
3. अवघातस्य अभ्यासेन अनुष्ठानम् उत अनभ्यासेन?
4. कपिञ्जलाधिकरणन्यायः कः?
5. उत्तरा दोहयतीत्यत्र को विचारः प्रस्तूयते?
6. द्वादशाहे सवनीयादीनां भेदः उत अभेदः?
7. अवहननादौ मन्त्रावृत्तिः अस्ति उत न?
8. अग्नीषोमीयादिपशुः कुत्र श्रप्यते?
9. विहारः किंनिमित्तः?
10. कर्मानुष्ठानकाले अनध्ययननियमः पालनीयः उत न?
11. अञ्जनादिसंस्काराणां सर्वगमित्वम् उत न?
12. समुच्चयो विकल्पो वा इति निर्णयः कथम्?
13. अहीने शुक्रस्पर्शादौ कस्य यजमानस्य कर्तृत्वम्?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. वाजपेये ब्रह्मसामकाले आलम्भोत्कर्षविचारः प्रस्तूयताम्।
15. कर्मणि मन्त्रोच्चारणस्वरविचारं परिशीलयत।

16. आर्त्विज्यस्य प्राबल्यं निरुप्य ब्राह्मणस्यैव आर्त्विज्यम् इति निरूपयत।

17. भूयोऽनुग्रहन्यायः व्याख्यायताम्।

18. समानदेवताकपशुषु अङ्गानां भेदाभेदविचारः प्रस्तूयताम्।

19. अङ्गगुणविरोधे प्रधानगुणस्यैव प्राबल्यं निरूप्यताम्।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. प्रयोगविधिर्नाम अन्यः विधिरस्तीति साधयत।

21. प्रयाजादीनां तन्त्रानुष्ठानं विवेचयत।

22. सोदाहरणं सापवादं प्रसङ्गं निरूपयत।

# A-I/2/22AMIS1CCTC2/23

## प्रथमसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-17)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. का त्रयीमार्गानुसारिणी?
2. यस्य कस्यचित् कर्मणः अन्यस्य वा प्रयोजनकथनस्य प्रयोजनं किम्?
3. "न हि जिज्ञासाशब्दः मीमांसापर्यायः" कुतः?
4. लोक इत्यादिभाष्यस्य षडर्थाः के?
5. प्रयत्नगौरवप्रसक्तिः कथं? निवारणं च कथम्?
6. उपलम्भपक्षः कः?
7. अध्याहारकल्पना कदा भवति?
8. 'प्रागपि च वेदाध्ययनात्' अस्य भाष्यस्य आशयः कः?
9. तादर्थ्ये चतुर्थीमुदाहरत।
10. को वा धर्मः? कुतोऽयं जिज्ञास्यः?
11. चोदनायाः वैशिष्ट्यं प्रतिपादयत।
12. अप्रामाण्यं कैः त्रिभिर्विधैः भिद्यते?
13. कः श्रेयस्करः? कथं सः तथाभूतः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. प्रतिज्ञासूत्रं व्याख्यात।
15. धर्मलक्षणं परिष्कुरुत।

16. “द्वयमेकेन सूत्रेण श्रुत्यर्थाभ्यां निरूप्यते” इतीदं व्याख्यात।

17. अपूर्वपदार्थः विव्रियताम्।

18. धर्मलक्षणं प्रमाणं च सूत्रेणैकेन कथं प्रतिपादितमिति निरूपयत।

19. प्रत्यक्षसूत्रं व्याख्यात।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. वेदवाक्यार्थतात्पर्यनिर्णये जैमिनिशास्त्रस्य उपादेयतां निरूपयत।

21. लोक इत्यादिभाष्यस्य षडर्थान् व्याख्यात।

22. प्रामाण्यवादं निरूपयत।

# A-I/3/22AMIS1CCTC3/23

**प्रथमसत्रार्द्धः**

**तृतीयपत्रम् (DSCC-18)**

**मीमांसा**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. का नाम पदैकवाक्यता ?
2. अर्थवादाधिकरणे प्रथमपूर्वपक्षसूत्रं लिखत।
3. अर्थवादानां स्वार्थे प्रामाण्यस्वीकारः कुतो न सम्भवति ?
4. कः शास्त्रविरोधः ? कश्च प्रसङ्गः ?
5. 'अभागि प्रतिषेधात्' अस्य सूत्रस्याभिप्रायः कः ?
6. अनित्यसंयोगः कथम्भूतः ?
7. अर्थवादाधिकरणप्रथमसिद्धान्तसूत्रे विधिपदद्वयस्य समन्वयः कथम् ?
8. कोऽयं गुणवादो नाम ?
9. औदुम्बराधिकरणविषयं लिखत।
10. लट् लेट् निश्चयः कथं कार्यः ?
11. कोऽयं वाक्यनियमो नाम ?
12. 'अविज्ञेयात्' इति सूत्रार्थः वर्ण्यताम्।
13. किं नाम अनुमन्त्रणम् ?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. शास्त्रदृष्टविरोधं व्याख्यात।
15. "तुल्यं च साम्प्रदायिकम्" अत्र को विशेषः ?

16. औदुम्बराधिकरणपूर्वपक्षः प्रस्तूयताम्।
17. "तेन ह्यन्नं क्रियते" इत्यस्य विध्येकवाक्यत्वं समर्थयत।
18. परिसंख्याविधिं निरूपयत।
19. मन्त्राधिकरणे ऊहस्य का प्रासङ्गिकता? विचारयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. अर्थवादानां विधिना सह एकवाक्यत्वं साधयत।
21. हेतुवन्निगदाधिकरणसारं सङ्गृह्यताम्।
22. विवक्षितवचनाः मन्त्राः इति पक्षं समर्थयत।

# A-I/4/22AMIS1CCTC4/23

## प्रथमसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-19)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. यज्ञशब्दः कतिसंस्थस्य ग्राह्यः?
2. दशविधं पशुप्रभवं निर्दिशत।
3. औषधहविर्भेदाः प्रदर्शनीयाः।
4. कः दर्शपदार्थः?
5. दर्शपूर्णमासयोः कस्य प्रथममनुष्ठानम्?
6. आहवनीय इत्यस्य निर्वचनं लिखत।
7. कः अन्वाहार्यपचनः?
8. कुतः दधि पयश्च सान्नाय्यम्?
9. किं नाम वत्सापाकरणम्?
10. कः आतञ्चनकालः?
11. के आतञ्चनविकल्पाः?
12. कः राजन्यः?
13. हविषां श्रपणं कुत्र विहितम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. हविषां स्वरूपं भेदान् च व्याख्यात।
15. नित्ययज्ञाः व्याख्यायन्ताम्।

16. पूर्णमासपदार्थं विवेचयत।
17. प्रस्तरनिधानक्रमं वर्णयत।
18. अभिमन्त्रणप्रोक्षणयोः विशेषान् व्याख्यात।
19. आहार्यपुरीषाखननप्रकारं वर्णयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. दर्शपूर्णमासयोः पूर्वाङ्गविचारमुपवर्णयत।
21. पिण्डपितृयज्ञविचारं वर्णयत।
22. दर्शपूर्णमासयोः परिस्तरण–परिधिस्थापनविचारम् उपवर्णयत।